✧˖°*❋ ❋*°˖✧

# श्री दशावतार स्तोत्र: प्रलय पयोधि-जले (Dashavtar Stotram: Pralay Payodhi Jale)

✧˖°*❋ ❋*°˖✧

# श्री दशावतार स्तोत्र

प्रलय पयोधि-जले धृतवान् असि वेदम्
विहित वहित्र-चरित्रम् अखेदम्
केशव धृत-मीन-शरीर, जय जगदीश हरे

क्षितिर् इह विपुलतरे तिष्ठति तव पृष्ठे
धरणि- धारण-किण चक्र-गरिष्ठे
केशव धृत-कूर्म-शरीर जय जगदीश हरे

वसति दशन शिखरे धरणी तव लग्ना
शशिनि कलंक कलेव निमग्ना
केशव धृत शूकर रूप जय जगदीश हरे

तव कर-कमल-वरे नखम् अद्भुत शृंगम्
दलित-हिरण्यकशिपु-तनु-भृंगम्
केशव धृत-नरहरि रूप जय जगदीश हरे

छलयसि विक्रमणे बलिम् अद्भुत-वामन
पद-नख-नीर-जनित-जन-पावन
केशव धृत-वामन रूप जय जगदीश हरे

क्षत्रिय-रुधिर-मये जगद् -अपगत-पापम्
स्नपयसि पयसि शमित-भव-तापम्
केशव धृत-भृगुपति रूप जय जगदीश हरे

वितरसि दिक्षु रणे दिक्-पति-कमनीयम्
दश-मुख-मौलि-बलिम् रमणीयम्
केशव धृत-राम-शरीर जय जगदीश हरे

वहसि वपुशि विसदे वसनम् जलदाभम्
हल-हति-भीति-मिलित-यमुनाभम्
केशव धृत-हलधर रूप जय जगदीश हरे

नंदसि यज्ञ- विधेर् अहः श्रुति जातम्
सदय-हृदय-दर्शित-पशु-घातम्
केशव धृत-बुद्ध-शरीर जय जगदीश हरे

म्लेच्छ-निवह-निधने कलयसि करवालम्
धूमकेतुम् इव किम् अपि करालम्
केशव धृत-कल्कि-शरीर जय जगदीश हरे

श्री-जयदेव-कवेर् इदम् उदितम् उदारम्
शृणु सुख-दम् शुभ-दम् भव-सारम्
केशव धृत-दश-विध-रूप जय जगदीश हरे

वेदान् उद्धरते जगंति वहते भू-गोलम् उद्बिभ्रते
दैत्यम् दारयते बलिम् छलयते क्षत्र-क्षयम् कुर्वते
पौलस्त्यम् जयते हलम् कलयते कारुण्यम् आतन्वते
म्लेच्छान् मूर्छयते दशाकृति-कृते कृष्णाय तुभ्यम् नमः

**- श्री जयदेव गोस्वामी**

≪ · ◦ ❈ ◦ · ≫

# Dashavtar Stotram

in English

Pralaya Payodhi-Jale Dhṛtavān Asi Vedam,
Vihita Vahitra-Charitram Akhedam.
Keśava Dhṛta-Mīna-Śarīra, Jay Jagadīśa Hare.

Kṣitir Iha Vipulatarae Tiṣṭhati Tava Pṛṣṭhe,
Dharaṇi-Dhāraṇa-Kiṇa Cakra-Gariṣṭhe.
Keśava Dhṛta-Kūrma-Śarīra, Jay Jagadīśa Hare.

Vasati Daśana Śikhare Dharaṇī Tava Laghnā,
Śaśini Kalaṁka Kaleva Nimagnā.
Keśava Dhṛta Śūkara Rūpa, Jay Jagadīśa Hare.

Tava Kara-Kamala-Vare Nakhma Adbhuta Śṛṅgam,
Dalita-Hiraṇyakaśipu-Tanu-Bhṛṅgam.
Keśava Dhṛta-Narahari Rūpa, Jay Jagadīśa Hare.

Chhalayasi Vikramaṇe Balim Adbhuta-Vāmana,
Pada-Nakha-Nīra-Janita-Janapāvana.
Keśava Dhṛta-Vāmana Rūpa, Jay Jagadīśa Hare.

Kṣatriya-Rudhira-Maye Jagad-Apagata-Pāpam,
Snapayasi Payasi Śamita-Bhava-Tāpam.
Keśava Dhṛta-Bhṛgupati Rūpa, Jay Jagadīśa Hare.

Vitarasi Dikṣu Raṇe Dik-Pati-Kamanīyam,
Daśa-Mukha-Mauli-Balim Ramaṇīyam.
Keśava Dhṛta-Rāma-Śarīra, Jay Jagadīśa Hare.

Vahasi Vapuśi Visade Vasanam Jaladābham,
Hala-Hati-Bhīti-Milita-Yamunābham.
Keśava Dhṛta-Haladhara Rūpa, Jay Jagadīśa Hare.

Nandasī Yajña-Vidher Ahāḥ Śruti Jātam,
Sadaya-Hṛdaya-Darśita-Paśu-Ghātam.
Keśava Dhṛta-Buddha-Śarīra, Jay Jagadīśa Hare.

Mleccha-Nivaha-Nidhane Kalayasi Karāvālam,
Dhūmaketum Iva Kim Api Karālam.
Keśava Dhṛta-Kalki-Śarīra, Jay Jagadīśa Hare.

Śrī-Jayadeva-Kaver Idam Uditam Udāram,
Śṛṇu Sukha-Dam Śubha-Dam Bhava-Sāram.
Keśava Dhṛta-Daśa-Vidha-Rūpa, Jay Jagadīśa Hare.

Vedān Uddharate Jaganti Vahate Bhū-Golam Udbibhrate,
Daityam Dārayate Balim Chalayate Kṣatra-Kṣayam Kurvate.
Paulastyam Jayate Halam Kalayate Kāruṇyam Ātanvate,
Mlecchān Mūrchayate Daśākṛti-Kṛte Kṛṣṇāya Tubhyam Namaḥ.

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧